# श्री आदि वाराही सहस्रनाम स्तोत्रं

श्रीवाराही ध्यानं:

नमोऽस्तु देवि वाराहि जयैंकारस्वरूपिणि
जय वाराहि विश्वेशि मुख्यवाराहि ते नमः ||1||

वाराहमुखि वंदे त्वां अंधे अंधिनि ते नमः
सर्वदुर्ष्टप्रदुष्टानां वाक्स्तंभनकरे नमः ||2||

नमः स्तंभिनि स्तंभे त्वां जृंभे जृंभिणि ते नमः
रुंधे रुंधिनि वंदे त्वां नमो देवेशि मोहिनि ||3||

स्वभक्तानां हि सर्वेषां सर्वकामप्रदे नमः
बाह्वोः स्तंभकरीं वंदे जिह्वास्तंभनकारिणीं ||4||

स्तंभनं कुरु शत्रूणां कुरु मे शत्रुनाशनं
शीघ्रं वश्यं च कुरु मे याऽग्नौ वागात्मिका स्थिता ||5||

ठचतुष्टयरूपे त्वां शरणं सर्वदा भजे
हुमात्मिके फड्रूपेण जय आद्यानने शिवे ||6||

देहि मे सकलान् कामान् वाराहि जगदीश्वरि
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ||7||

वाराही गायत्री:

वराहमुख्यै विद्महे दंडनाथायै धीमही तन्नो अर्घ्रि प्रचोदयात्।

अथ श्री आदिवाराही सहस्रनाम स्तोत्रं:

अथ ध्यानं

वंदे वाराहवक्त्रां वरमणिमकुटां विद्रुमश्रोत्रभूषां
हाराग्रैवेयतुंगस्तनभरनमितां पीतकौशेयवस्त्रां
देवीं दक्षोर्ध्वहस्ते मुसलमथपरं लांगलं वा कपालं
वामाभ्यां धारयंतीं कुवलयकलिकां श्यामलां सुप्रसन्नां

देव्युवाच:

श्रीकंठ करुणासिंधो दीनबंधो जगत्पते
भूतिभूषितसर्वांग परात्परतर प्रभो ||1||

कृतांजलिपुटा भूत्वा पृच्छाम्येकं दयानिधे
आद्या या चित्स्वरूपा या निर्विकारा निरंजना ||2||

बोधातीता ज्ञानगम्या कूटस्थाऽऽनंदविग्रहा
अग्राह्याऽतींद्रिया शुद्धा निरीहा स्वावभासिका ||3||

गुणातीता निष्प्रपंचा ह्यवाङ्मनसगोचरा
प्रकृतिर्जगदुत्पत्तिस्थितिसंहारकारिणी ||4||

रक्षार्थे जगतां देवकार्यार्थं वा सुरद्विषां
नाशाय धत्ते सा देहं तत्तत्कार्यैकसाधनं ||5||

तत्र भूधरणार्थाय यज्ञविस्तारहेतवे
विद्युत्केशहिरण्याक्षबलाकादिवधाय च ||6||

आविर्बभूव या शक्तिर्घोरा भूदाररूपिणी
वाराही विकटाकारा दानवासुरनाशिनी ||7||

सद्यःसिद्धिकरी देवी धोरा घोरतरा शिवा
तस्याः सहस्रनामाख्यं स्तोत्रं मे समुदीरय ||8||

कृपालेशोऽस्ति मयि चेद्भाग्यं मे यदि वा भवेत्
अनुग्राह्या यद्यहं स्यां तदा वद दयानिधे ||9||

ईश्वर उवाच:

साधु साधु वरारोहे धन्या बहुमतासि मे
शुश्रूषादिसमुत्पन्ना भक्तिश्रद्धासमन्विता तव ||10||

सहस्रनाम वाराह्याः सर्वसिद्धिविधायि च
तव चेन्न प्रवक्ष्यामि प्रिये कस्य वदाम्यहं ||11||

किंतु गोप्यं प्रयत्नेन संरक्ष्यं प्राणतोऽपि च
विशेषतः कलियुगे न देयं यस्य कस्यचित्
सर्वेऽन्यथा सिद्धिभाजो भविष्यंति वरानने ||12||

ॐ अस्य श्री वाराहीसहस्रनामस्तोत्रस्य महादेव ऋषिः अनुष्टुप्छंदः

वाराही देवता “ऐं” बीजं “क्रों” शक्तिः “हुं” कीलकं

मम सर्वार्थसिद्ध्यर्थे जपे विनियोगः

ॐ वाराही वामनी वामा बगला वासवी वसुः
वैदेही विरसूर्बाला वरदा विष्णुवल्लभा ||13||

वंदिता वसुदा वश्या व्यात्तास्या वंचिनी बला
वसुंधरा वीतिहोत्रा वीतरागा विहायसी ||14||

सर्वा खनिप्रिया काम्या कमला कांचनी रमा
धूम्रा कपालिनी वामा कुरुकुल्ला कलावती ||15||

याम्याऽग्नेयी धरा धन्या धर्मिणी ध्यानिनी ध्रुवा
धृतिर्लक्ष्मीर्जया तुष्टिः शक्तिर्मेधा तपस्विनी ||16||

वेधा जया कृतिः कांतिः स्वाहा शांतिर्दमा रतिः
लज्जा मतिः स्मृतिर्निद्रा तंद्रा गौरी शिवा स्वधा ||17||

चंडी दुर्गाऽभया भीमा भाषा भामा भयानका
भूदारा भयापहा भीरुर्भैरवी भंगरा भटी ||18||

घुर्घुरा घोषणा घोरा घोषिणी घोणसंयुता
घनाधना घर्घरा च घोणयुक्ताऽघनाशिनी ||19||

पूर्वाग्नेयी पातु याम्या वायव्युत्तरवारुणी
ऐशान्यूर्ध्वाधःस्थिता च पृष्टा दक्षाग्रवामगा ||20||

ह्रन्नाभिब्रह्मरंध्रार्कस्वर्ग पातालभूमिगा
ऐं श्रीः ह्रीः क्लीं तीर्थगतिः प्रीतिर्धीर्गीः कलाऽव्यया ||21||

ऋग्यजुः सामरूपा च परा यात्रिण्युदुंबरा
गदासिशक्तिचापेषुशूलचक्रक्रष्टिधारिणी ||22||

जरती युवती बाला चतुरंगबलोत्कटा
सत्याक्षरा चाधिभेत्री धात्री पात्री परा पटुः ||23||

क्षेत्रज्ञा कंपिनी ज्येष्ठा दूरधर्शा धुरंधरा
मालिनी मानिनी माता माननीया मनस्विनी ||24||

महोत्कटा मन्युकरी मनुरूपा मनोजवा
मेदस्विनी मद्यरता मधुपा मंगलाऽमरा ||25||

माया माताऽऽमयहरी मृडानी महिला मृतिः
महादेवी मोहहरी मंजुर्मृत्युंजयाऽमला ||26||

मांसला मानवा मूला महारात्रिमहालसा
मृगांका मीनकारी स्यान्महिषघ्नी मदंतिका ||27||

मूर्च्छामोहमृषामोघामदमृत्युमलापहा
सिंहर्क्षमहिषव्याघ्रमृगक्रोडानना धुनी ||28||

धरिणी धारिणी धेनुर्धरित्री धावनी धवा
धर्मध्वना ध्यानपरा धनधान्यधराप्रदा ||29||

पापदोषरिपुव्याधिनाशिनी सिद्धिदायिनी
कलाकाष्ठात्रपापक्षाऽहस्त्रुटिश्वासरूपिणी ||30||

समृद्धा सुभुजा रौद्री राधा राका रमाऽरणिः
रामा रतिः प्रिया रुष्टा रक्षिणी रविमध्यगा ||31||

रजनी रमणी रेवा रंकिनी रंजिनी रमा
रोषा रोषवती रूक्षा करिराज्यप्रदा रता ||32||

रूक्षा रूपवती रास्या रुद्राणी रणपंडिता
गंगा च यमुना चैव सरस्वतिस्वसूर्मधुः ||33||

गंडकी तुंगभद्रा च कावेरी कौशिकी पटुः
खट्वोरगवती चारा सहस्राक्षा प्रतर्दना ||34||

सर्वज्ञा शांकरी शास्त्री जटाधारिण्ययोरदा
यावनी सौरभी कुब्जा वक्रतुंडा वधोद्यता ||35||

चंद्रापीडा वेदवेद्या शंखिनी नील्लओहिता
ध्यानातीताऽपरिच्छेद्या मृत्युरूपा त्रिवर्गदा ||36||

अरूपा बहुरूपा च नानारूपा नतानना
वृषाकपिर्वृषारूढा वृषेशी वृषवाहना ||37||

वृषप्रिया वृषावर्ता वृषपर्वा वृषाकृतिः
कोदंडिनी नागचूडा चक्षुष्या परमार्थिका ||38||

दुर्वासा दुर्ग्रहा देवी सुरावासा दुरारिहा
दुर्गा राधा दुर्गहंत्री दुराराध्या दवीयसी ||39||

दुरावासा दुःप्रहस्ता दुःप्रकंपा दुरुहिणी
सुवेणी श्रमणी श्यामा मृगव्याधाऽर्कतापिनी ||40||

दुर्गा तार्क्षी पाशुपती कौणपी कुणपाशना
कपर्दिनी कामकामा कमनीया कलोज्वला ||41||

कासावह्वत्कारकानी कंबुकंठी कृतागमा
कर्कशा कारणा कांता कल्पाऽकल्पा कटंकटा ||42||

श्मशाननिलया भिन्नी गजारुढा गजापहा
तत्प्रिया तत्परा राया स्वर्भानुः कालवंचिनी ||43||

शाखा विशाखा गोशाखा सुशाखा शेषशाखिनी
व्यंगा सुभांगा वामांगा नीलांगाऽनंगरूपिणी ||44||

सांगोपांगा च शारंगा शुभांगा रंगरूपिणी
भद्रा सुभद्रा भद्राक्षी सिंहिका विनताऽदितिः ||45||

हृद्या वद्या सुपद्या च गद्यपद्यप्रिया प्रसूः
चर्चिका भोगवत्यंबा सारसी शबरी नटी ||46||

योगिनी पुष्कलाऽनंता परा सांख्या शची सती
निम्नगा निम्ननाभिश्च सहिष्णुर्जागृती लिपिः ||47||

दमयंती दमी दंडोद्दंडिनी दारदायिका
दीपिनी धाविनी धात्री दक्षकन्या दरिद्रती ||48||

दाहिनी द्रविणी दर्वी दंडिनी दंडनायिका
दानप्रिया दोषहंत्री दुःखदारिद्र्यनाशिनी ||49||

दोषदा दोषकृद्दोग्ध्री दोहदा देविकाऽदना ।
दर्वीकरी दुर्वलिता दुर्युगाऽद्वयवादिनी ||50||

चराचराऽनंतवृष्टिरुन्मत्ता कमलालसा
तारिणी तारकांतारा परात्मा कुब्जलोचना ||51||

इंदुर्हिरण्यकवचा व्यवस्था व्यवसायिका
ईशनंदा नदी नागी यक्षिणी सर्पिणी वरी ||52||

सुधा सुरा विश्वसहा सुवर्णांगदधारिणी
जननी प्रीतिपाकेरुः साम्राज्ञी संविदुत्तमा ||53||

अमेयाऽरिष्टदमनी पिंगला लिंगधारिणी चामुंडा प्लाविनी हाला बृहज्ज्योतिरुरुक्रमा ||54||

सुप्रतीका च सुग्रीवा हव्यवाहा प्रलापिनी
नभस्या माधवी ज्येष्ठा शिशिरा ज्वालिनी रुचिः ||55||

शुक्ला शुक्रा शुचा शोका शुकी भेकी पिकी भकी
पृषदश्वा नभोयोनी सुप्रतीका विभावरी ||56||

गर्विता गुर्विणी गण्या गुरुर्गुरुतरी गया
गंधर्वी गणिका गुंद्रा गारुडी गोपिकाऽग्रगा ||57||

गणेशी गामिनी गंत्री गोपतिर्गंधिनी गवी
गर्जिता गाननी गोना गोरक्षा गोविदां गतिः ||58||

ग्राथिकी ग्रथिकृद्गोष्ठी गर्भरूपा गुणैषिणी
पारस्करी पांचनदा बहुरूपा विरूपिका ||59||

ऊहा व्यूहा दुरूहा च सम्मोहा मोहहारिणी
यज्ञविग्रहिणी यज्ञा यायजूका यशस्विनी ||60||

अग्निष्ठोमोऽत्यग्निष्टोमो वाजपेयश्च षोडशी
पुंडरीकोऽश्वमेधश्च राजसूयश्च नाभसः ||61||

स्विष्टकृद्बहुसौवर्णो गोसवश्च महाव्रतः विश्वजिद्ब्रह्मयज्ञश्च प्राजापत्यः शिलायवः ||62||

अश्वक्रांतो रथक्रांतो विष्णुक्रांतो विभावसुः
सूर्यक्रांतो गजक्रांतो बलिभिन्नागयज्ञकः ||63||

सावित्री चार्धसावित्री सर्वतोभद्रवारुणः
आदित्यामयगोदोहगवामयमृगामयाः ||64||

सर्पमयः कालपिंजः कौंडिन्योपनकाहलः
अग्निविद्द्वादशाहः स्वोपांशुः सोमदोहनः ||65||

अश्वप्रतिग्रहो बर्हिरथोऽभ्युदय ऋद्धिराट्
सर्वस्वदक्षिणो दीक्षा सोमाख्या समिदाह्वयः ||66||

कठायनश्च गोदोहः स्वाहाकारस्तनूनपात्
दंडापुरुषमेधश्च श्येनो वज्र इषुर्यमः ||67||

अंगिरा कंगभेरुंडा चांद्रायणपरायणा
ज्योतिष्ठोमः कुतो दर्शो नंद्याख्यः पौर्णमासिकः ||68||

गजप्रतिग्रहो रात्रिः सौरभः शांकलायनः
सौभाग्यकृच्च कारीषो वैतलायनरामठी ||69||

शोचिष्कारी नाचिकेतः शांतिकृत्पुष्टिकृत्तथा
वैनतेयोच्चाटनौ च वशीकरणमारणे ||70||

त्रैलोक्यमोहनो वीरः कंदर्पबलशातनः शंखचूडो गजाच्छायो रौद्राख्यो विष्णुविक्रमः ||71||

भैरवः कवहाख्यश्चावभृथोऽष्टाकपालकः
श्रौषट् वौषट् वषट्कारः पाकसंस्था परिश्रुती ||72||

चयनो नरमेधश्च कारीरी रत्नदानिका
सौत्रामणी च भारुंदा बार्हस्पत्यो बलंगमः ||73||

प्रचेताः सर्वसत्रश्च गजमेधः करंभकः
हविःसंस्था सोमसंस्था पाकसंस्था गरुत्मती ||74||

सत्यसूर्यश्चमसः स्रुक्स्रुवोलूखलमेक्षणी
चपलो मंथिनी मेढी यूपः प्राग्वंशकुंजिका ||75||

रश्मिरशुश्च दोभ्यश्च वारुणोदः पविः कुथा
आप्तोर्यामो द्रोणकलशो मैत्रावरुण आश्विनः ||76||

पात्नीवतश्च मंथी च हारियोजन एव च
प्रतिप्रस्थानशुक्रौ च सामिधेनी समित्समा ||77||

होताऽध्वर्युस्तथोद्धाता नेता त्वष्टा च योत्रिका
आग्नीध्रोऽच्छवगाष्टावग्रावस्तुत्प्रतर्दकः ||78||

सुब्रह्मण्यो ब्राह्मणश्च मैत्रावरुणवारुणौ
प्रस्तोता प्रतिप्रस्थाता यजमाना ध्रुवंत्रिका ||79||

आमिक्षामीषदाज्यं च हव्यं कव्यं चरुः पयः
जुहूद्धुणोभृत् ब्रह्मा त्रयी त्रेता तरश्विनी ||80||

पुरोडाशः पशुकर्षः प्रेक्षणी ब्रह्मयज्ञिनी
अग्निजिह्वा दर्भरोमा ब्रह्मशीर्षा महोदरी ||81||

अमृतप्राशिका नारायणी नग्ना दिगंबरा
ओंकारिणी चतुर्वेदरूपा श्रुतिरनुल्वणा ||82||

अष्टादशभुजा रंभा सत्या गगनचारिणी
भीमवक्त्रा महावक्त्रा कीर्तिराकृष्णपिंगला ||83||

कृष्णमूर्द्धा महामूर्द्धा घोरमूर्द्धा भयानना
घोराननना घोरजिह्वा घोररावा महाव्रता ||84||

दीप्तास्या दीप्तनेत्रा चंडप्रहरणा जटी
सुरभी सौनभी वीची छाया संध्या च मांसला ||85||

कृष्णा कृष्णांबरा कृष्णशार्ङ्गिणी कृष्णवल्लभा त्रासिनी मोहिनी द्वेष्या मृत्युरूपा भयावहा ||86||

भीषणा दानवेंद्रघ्नी कल्पकर्त्री क्षयंकरी
अभया पृथिवी साध्वी केशिनी व्याधिजन्महा ||87||

अक्षोभ्या ह्लादिनी कन्या पवित्रा रोपिणी शुभा
कन्यादेवी सुरादेवी भीमादेवी मदंतिका ||88||

शाकंबरी महाश्वेता धूम्रा धूम्रेश्वरीश्वरी
वीरभद्रा महाभद्रा महादेवी महासुरी ||89||

श्मशानवासिनी दीप्ता चितिसंस्था चितिप्रिया
कपालहस्ता खट्वांगी खड्गिनी शूलिनी हली ||90||

कांतारिणी महायोगी योगमार्गा युगग्रहा
धूम्रकेतुर्महास्यायुर्युगानां परिवर्तिनी ||91||

अंगारिण्यंकुशकरा घंटावर्णा च चक्रिणी वेताली ब्रह्मवेताली महावेतालिका तथा ||92||

विद्याराज्ञी मोहराज्ञी महाराज्ञी महोदरी
भूतं भव्यं भविष्यं च सांख्यं योगस्ततो दमः ||93||

अध्यात्मं चाधिदैवं चाधिभूतांश एव च
घंटारवा विरूपाक्षी शिखिचिच्छ्रीचयप्रिया ||94||

खड्गशूलगदाहस्ता महिषासुरमर्दिनी
मातंगी मत्तमातंगी कौशिकी ब्रह्मवादिनी ||95||

उग्रतेजा सिद्धसेना जृंभिणी मोहिनी तथा जया च विजया चैव विनता कद्रुरेव च ||96||

धात्री विधात्री विक्रांता ध्वस्ता मूर्च्छा च मूर्च्छनी
दमनी दामिनी दम्या छेदिनी तापिनी तपी ||97||

बंधिनी बाधिनी बंध्या बोधातीता बुधप्रिया
हरिणी हारिणी हंत्री धरिणी धारिणी धरा ||98||

विसाधिनी साधिनी च संध्या संगोपनी प्रिया
रेवती कालकर्णी च सिद्धिलक्ष्मीररुंधती ||99||

धर्मप्रिया धर्मरतिः धर्मिष्ठा धर्मचारिणी
व्युष्टिः ख्यातिः सिनीवाली कुहूः ऋतुमती मृतिः ||100||

तवाष्ट्री वैरोचनी मैत्री नीरजा कैटभेश्वरी
भ्रमणी भ्रामणी भ्रामा भ्रमरी भ्रामरी भ्रमा ||101||

निष्कला कलहा नीता कौलाकारा कलेबरा
विद्युज्जिह्वा वर्षिणी च हिरण्याक्षनिपातिनी ||102||

जितकामा कामृगया कोला कल्पांगिनी कला
प्रधाना तारका तारा हितात्मा हितभेदिनी ||103||

दुरक्षरा परंब्रह्म महाताना महाहवा
वारुणी व्यरुणी वाणी वीणा वेणी विहंगमा ||104||

मोदप्रिया मोदकिनी प्लवनी प्लाविनी प्लुतिः अजरा लोहिता लाक्षा प्रतप्ता विश्वभोजिनी ||105||

मनो बुद्धिरहंकारः क्षेत्रज्ञा क्षेत्रपालिका
चतुर्वेदा चतुर्भारा चतुरंता चरुप्रिया ||106||

चर्विणी चोरिणी चारी चांकरी चर्मभेभैरवी
निर्लेपा निष्प्रपंचा च प्रशांता नित्यविग्रहा ||107||

स्तव्या स्तवप्रिया व्याला गुरुराश्रितवत्सला
निष्कलंका निरालंबा निर्द्वंद्वा निष्परिग्रहा ||108||

निर्गुणा निर्मला नित्या निरीहा निरघा नवा
निरिंद्रिया निराभासा निर्मोहा नीतिनायिका ||109||

निरिंधना निष्कला च लीलाकारा निरामया
मुंडा विरूपा विकृता पिंगलाक्षी गुणोत्तरा ||110||

पद्मगर्भा महागर्भा विश्वगर्भा विलक्षणा
परमात्मा परेशानी परा पारा परंतपा ||111||

संसारसेतुः क्रूराक्षी मूर्च्छा मत्ता मनुप्रिया
विस्मया दुर्जया दक्षा तनुहंत्री दयालया ||112||

परब्रह्माऽऽनंदरूपा सर्वसिद्धिविधायिनी ॐ
एवमुड्डामरतंत्रान्मयोद्धृत्य प्रकाशितं ||113||

गोपनीयं प्रयत्नेन नाख्येयं यस्य कस्यचित्
यदीच्छसि द्रुतं सिद्धिं ऐश्वर्यं चिरजीवितां ||114||

आरोग्यं नृपसम्मानं तदा नामानि कीर्तयेत्
नाम्नां सहस्रं वाराह्याः मया ते समुदीरितं ||115||

यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ।
अश्वमेधसहस्रस्य वाजपेयशतस्य च ||116||

पुंडरीकायुतस्यापि फलं पाठात् प्रजायते
पठतः सर्वभावेन सर्वाः स्युः सिद्धयः करे ||117||

जायते महदैश्वर्यं सर्वेषां दयितो भवेत्
धनसारायते वह्निरगाधोऽब्धिः कणायते ||118||

सिद्धयश्च तृणायंते विषमप्यमृतायते
हारायंते महासर्पाः सिंहः क्रीडामृगायते ||119||

दासायंते महीपाला जगन्मित्रायतेऽखिलं
तस्मान्नाम्नां सहस्रेण स्तुता सा जगदंबिका
प्रयच्छत्यखिलान् कामान् देहांते परमां गतिं ||120||

इति उड्डामरतंत्रांतर्गतं श्री आदि वाराही सहस्रनाम स्तोत्रं संपूर्णं